|| श्री गणेशाय नमः ||

# हरी ॐ धार्मिक पूजा विधी केंद्र

Astro • Puja • Vastu

ज्योतिष आणि वास्तु सल्लागार

## पवमान सूक्तम

सहस्राक्षं शतधारमृषिभिः पावनं कृतम् । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १ ॥

येन पूतमन्तरिक्षं यस्मिन्वायुरधिश्रितः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ २ ॥

येन पूते द्यावापृथिवी आपः पूता अथो स्वः । तेना सहस्त्रधारेण पवमानः पुनातु माम् ॥ ३ ॥

येन पूते अहोरात्रे दिशः पूता उत येन प्रदिशः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ४ ॥

येन पूतौ सूर्याचन्द्रमसौ नक्षत्राणि भूतकृतः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ५ ॥

येन पूता वेदिरग्नयः परिधयः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ६ ॥

येन पूतं बर्हिराज्यमथो हविर्येन पूतो यज्ञो वषट्कारो हुताहुतिः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ७ ॥

येन पूतौ व्रीहियवौ याभ्यां यज्ञो अधिनिर्मितः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ८ ॥

येन पूता अश्वा गावो अथो पूता अजावयः । तेना सहस्त्रधारेण पवमानः पुनातु माम् ॥ ९ ॥

येन पूता ऋचः सामानि यजुर्ब्राह्मणं सह येन पूतम् । तेना सहस्रधारेण पवमानः पुनातु माम्॥ १० ॥

येन पूता अथर्वाङ्गिरसो देवताः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ ११ ॥

येन पूता ऋतवो येनार्तवा येभ्यः संवत्सरो अधिनिर्मितः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १२ ॥

येन पूता वनस्पतयो वानस्पत्या ओषधयो वीरुधः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १३ ॥

येन पूता गन्धर्वाप्सरसः सर्पपुण्यजनाः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १४ ॥

येन पूताः पर्वता हिमवन्तो वैश्वानराः परिभुवः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १५ ॥

येन पूता नद्यः सिन्धवः समुद्राः सह येन पूताः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १६ ॥

येन पूता विश्वेदेवाः परमेष्ठी प्रजापतिः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १७ ॥

येन पूतः प्रजापतिर्लोकं विश्वं भूतं स्वराजभार । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १८ ॥

येन पूतः स्तनयित्नुरपामुत्सः प्रजापतिः । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ १९ ॥

येन पूतमृतं सत्यं तपो दीक्षां पूतयते । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ २० ॥

येन पूतमिदं सर्वं यद्भूतं यच्च भाव्यम् । तेना सहस्रधारेण पवमानः पुनातु माम् ॥ २१ ॥


## HARI OM DHARMIK PUJA VIDHI KENDRA

योगेशशास्त्री ढवळे (गुरुजी) : 95944 28749 | निलेशशास्त्री ढवळे (गुरुजी) : 86524 02078

**SANPADA OFFICE**
Office No.8, 1st Flr, Shiva Triveni Galleria CHS.,
Plot No. 13, Sector 8, Sanpada, Navi Mumbai

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir, Deonar
Mahanagarpalika Vasahat, Govandi, Mumbai.

hariom astrologers | hariom astrologers | hariom_astrologers
hariomastrologers@gmail.com | www.hariomastrologers.com